# समाजसापेक्षं कालिदासीयचिन्तनम्

**उत्तमप्रसादः खतिवडाः**
**सहप्राध्यापकः**
**नेपालसंस्कृतविश्वविद्यालयः**
**इमेल-upsharma977@gmail.com**

**शोधसारः**

*विश्ववाङ्मये संस्कृतवाङ्मयस्य महत्त्वपूर्णं स्थानमस्ति। संस्कृतवाङ्मयेऽपि विविधा विषया विलसन्ति। तेषु काव्यवाङ्मयं महत्त्वपूर्णं मन्यते। काव्येष्वपि कालिदासीयानां काव्यानां लोकोत्तरं महत्त्वं विद्यते। कालिदासीयकाव्येषु न केवलं सौन्दर्यचेतनाया विकासोऽपितु सामाजिकचेतनाया अपि प्रसारो दृश्यते। राष्ट्रे समाजे व्यक्तौ च कीदृशी भावना अपेक्ष्यत इति तत्र तत्राभिव्यक्तमनुभूयते। राज्यसञ्चालनस्य सन्दर्भे मानवजीवनस्य यापनसन्दर्भे तथा जीवनस्य विविधसन्दर्भे कीदृशो व्यवहार आवश्यक इत्यादयो विषया अपि कालिदासीयकाव्येषु चिन्तिताः सन्ति- 'शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्..., 'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः' 'नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण', 'आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि', 'न धर्मवृद्धेषु वयः समीक्ष्यते', 'शरीरमाद्यं खलु धर्मसाधनम्' इत्यादीनि वचांसि साम्प्रतिकस्य समाजस्याप्यादर्शभूतानि सन्ति। वस्तुतः काव्यप्रयोजनप्रतिपादयद्भिः प्रस्तुतानि सर्वाण्यपि प्रयोजनानि कालिदासस्य काव्यात्सिध्यन्ति। तादृशः कोऽपि सामाजिको विषयो न विद्यते यस्य वर्णनं कालिदासेन न विहितं स्यात्। अतः कालिदासस्य काव्यानि शासकानां सामाजिकानामन्येषाञ्च जनानां कृते आदर्शमयानि वेविद्यन्त इति।*

**प्रमुखाः शब्दाः-**

खनिः, चीनांशुकम्, ज्ञानपण्यः, धीवरः मध्यस्थः।

**विषयपरिचयः**

संस्कृतसाहित्यं खलु विश्वसाहित्य एव सर्वोत्कृष्टतां भजते। संस्कृतसाहित्यस्य वैदिककालादारभ्य इदानीं यावद् गौरवं निरवच्छिन्नं प्रवहमानं विलोक्यते। संस्कृतभाषेयं विश्वस्य अनेकासु भाषासु सर्वोत्कृष्टा वेविद्यते। भाषायामस्यां विरचितानि वेदादिशास्त्राणि भागवतादिपुराणानि च समग्रमानवजीवनस्य मार्गप्रकाशकानि सन्ति। महर्षिणा वाल्मीकिना विरचितं रामायणं पौरस्त्यसभ्यताया आदर्शभूतमादिकाव्यं विद्यते। तथैव वेदव्यासेन ग्रथितं शतसाहस्रीसंहिताख्यं महाभारतं राजनीतिधर्मदर्शनज्ञानविज्ञानादिसमग्रविषयाणां रहस्यप्रकाशकं विपुलतममार्षमहाकाव्यं विद्यते। धर्मादिचतुः पुरुषार्थप्रदानक्षमं विश्वस्मिन् विश्व एवाद्वितीयं महाकाव्यमिदं संस्कृतसाहित्यस्यामूल्यनिधिरस्ति। उभे एव रामायणमहाभारताख्ये आर्षमहाकाव्ये संस्कृतवाङ्मयस्यादर्शरूपे मार्गनिर्देशके स्तः। एवमेव महापुराणोपपुराणान्यपि पौरस्त्यसंस्कृतेः सभ्यताया धर्मस्य च सर्वस्वरूपेण प्रतिष्ठितानि समाजस्यादर्शप्रदर्शकानि च सन्ति। तान्येव रामायणादीनि परमादर्शमयानि काव्यान्युपजीव्य तदुत्तरवर्तिनः कवय खण्डकाव्यमहाकाव्यादीनि श्रव्यकाव्यानि नाटकादीनि दृश्यकाव्यानि गद्यपद्योभयरूपाणि चम्पूकाव्यानि च प्रणीय देवभाषया काव्यप्रणयनपरम्परामविच्छिन्नरूपेण प्रवाहमयीं व्यदधुः। तानि च काव्यानि रामायणकालादारभ्याद्यावधि सहृदयानां पाठकानां दर्शकानाञ्च हृदयानि प्रसभमेव स्वायत्तीकृत्य समाह्लादयन्ति। तेषु काव्येषु च पद्यकाव्यानि रसभावादिजन्यानन्देन सदैव साङ्गीतिकमानन्दमपि प्रयच्छन्ति। सहृदयपाठकानां मनोरञ्जकतयैव तेषां काव्यानां गौरवमुत्कृष्टतमञ्चास्ति। संस्कृतसाहित्ये पद्यकाव्यप्रणयनकलाकुशला लब्धयशसोऽनेके महाकवयोऽभूवन्। तेषु

कालिदासभारविमाघश्रीहर्षादयो महाकवयो रसभावादिसमन्वितानि खण्डकाव्यानि महाकाव्यानि च प्रणीय यशोमयैः शरीरैरजरा अमरा च बभूवुः। एतेषु कविषु महाकविः कालिदासः ज्यैष्ठ्यं श्रैष्ठ्यञ्चाधत्ते। अस्य कवेः संस्कृतसाहित्ये प्रसिद्धानि काव्यानि नाटकानि च विद्यन्ते। अनेन कविना स्वविरचितेषु साहित्येषु लोककल्याणाय राष्ट्रोन्नतये च आवश्यकानि चिन्तनानि प्रकटितानि प्राप्यन्ते। वस्तुतः यस्य कस्यापि कवेः काव्यरचना स्वकालीनपरिस्थितेर्निरपेक्षा न भवति। प्रत्येकस्यापि कवेः कृतिस्तत्कालीनपरिस्थित्या, तत्कालीनसामाजिकाचारविचारैः प्रभाविता भवति। कस्यापि कवे रचना, निर्मितिर्वा स्वकीयस्य रचनाकालस्य प्रभावं स्वीकरोति।। महाकविः कालिदासोऽपि स्वकालीनपरिस्थित्या स्वकालीनैः स्वस्थानीयैश्च सामाजिकाचारविचारैः प्रभावित आसीदिति सत्यम्; तथापि तस्य कविकर्म नैकदेशीयम्, नैककालिकम्, नैकसामाजिकञ्च। तस्य सन्देशाः सार्वभौमाः सार्वजनीनाः सार्वयुगीनाश्च जायन्ते।तस्यकविकर्मणउपयोगितायादृशीतदानीमासीदधुनाऽपिसातादृश्येववर्त्तते।कालिदासस्याप्यवदानमिदानीमपि तादृशमेवास्ति यथा तदानीमासीत्, वस्तुतः इदमेव महाकवेर्महाकवित्वम्। महाकविर्दिक्कालाद्यनवच्छिन्नायाः परिस्थितेरूर्ध्वमुत्थाय दिक्कालाद्यनवच्छिन्नान् शाश्वतान् सन्देशान् दातुमिच्छति। अधुना जगति विविधविषयेषु समस्या दृश्यते। तत्र कृषि-वाणिज्य-पशु-वन-खन्यादयो विषयाः प्रामुख्यं भजन्ते। महाकविना कालिदासेन स्वकीयासु रचनासु इमानि साधनानि विस्तरतो निर्दिष्टानि सन्ति। तस्मिन् तस्मिन् विषये कालिदासेन कीदृशं चिन्तनमभिव्यक्तं तानि चिन्तनानि यथाग्रन्थमत्र प्रस्तूयन्ते।

## अध्ययनविधिः

अनुसन्धानस्यास्य निष्पादनायावश्यकसामग्रीसङ्कलनाय च विशेषरूपेण पुस्तकालयीयाध्ययनविधिरेवात्राङ्गीकृतोऽस्ति। कालिदासस्य चिन्तनाभिव्यक्ताः कालिदासीयग्रन्थाः तत्सम्बद्धा अन्ये ग्रन्थास्तथा विदुषामालेखाश्च अध्ययनस्यास्य प्रमुखसामग्रीत्वेनोरीकृताः सन्ति। कालिदासीयचिन्तनबोधनक्रमे आगमननिगमनादिविधयस्तथा सञ्चितसामग्रीणामध्ययनाय यथायथं चिन्तनमननिदिध्यासनादिविधयश्चावलम्बिताः। यथावश्यकमत्र पारम्परिकी पद्धतिः, ए.पी.ए पद्धतिश्च स्वीकृतास्ति।

## अध्ययनस्य प्रमुखाः समस्याः

कालिदासीयग्रन्थाः बहुभिरधीताः परं तत्राभिव्यक्तं विशिष्टं चिन्तनं सर्वैर्नैवाकलितम्। अध्ययनेऽस्मिन् कालिदासविरचितेषु ग्रन्थेषु सार्वकालिकानि सार्वदेशिकानि च यानि यानि चिन्तनानि प्रकटितानि तानि यथायथमत्र प्रस्तूयन्त इति संक्षेपतो निम्नाङ्किता समस्या प्रसङ्गेऽस्मिन् दृग्गोचरीभवति। यथा–

क) समाजसापेक्षं कालिदासीयचिन्तनं कीदृशम्? इति।

## अध्ययनस्योद्देश्यम्

पौरस्त्यवाङ्मये दर्शनस्य साहित्यस्य च महत्त्वपूर्णं स्थानं वरीवर्ति। साहित्येऽपि सामाजिकं धार्मिकंमाध्यात्मिकञ्च चिन्तनं प्रकटितं जायते। तत्रापि कालिदासीयसाहित्येषु प्रधानतया तादृशानां चिन्तनानां बाहुल्यमनुभूयते। सम्प्रति कालिदासीयग्रन्थानामध्ययनपूर्वकं तत्राभिव्यक्तानि सामाजिकचिन्तनानि विचार्याध्ययनं विधीयते। अतः संक्षेपेण विचारिते आलेखस्यास्य निम्नाङ्कितमुद्देश्यं दरीदृश्यते। यथा –

क) समाजसापेक्षं कालिदासीयचिन्तनम्।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

पौरस्त्यवाङ्मयसम्बद्धाः कालिदासीयग्रन्था अध्ययनस्यास्य क्षेत्रमस्ति। महाकविकालिदासविरचितानि महाकाव्यानि नाटकानि च प्रमुखरूपेण क्षेत्रान्तर्गतानि सन्ति चेत्तत्सम्बद्धा अन्ये विषयाश्च सहायकरूपेणात्रानुस्यूतानि

सन्ति। अतः कालिदासीयं चिन्तनं मुख्यं क्षेत्रं तदतिरिक्ता विचाराश्च सीमारूपाः सन्ति।

## समाससापेक्षं कालिदासीयचिन्तनावलोकनम्

साहित्यं खलु समाजसापेक्षं जायते। कवयश्चिन्तका विवेचकाश्च समाजं दृष्ट्वैव स्वकीयं चिन्तनं प्रवाहयन्ति। समाजसम्बद्धान् विषयान् दृष्ट्वा तद्भावनाभाविताः सन्तः स्वकीयं विचारं प्रकटयन्ति। संस्कृतसाहित्यजगति बहवः कवयोऽभूवन्। तेषु कालिदासोऽप्यन्यतमः। कालिदासेन काव्यनाटकसम्बद्धानि बहूनि ग्रन्थरत्नानि निर्मितानि। तत्र तत्र तेन समाजसम्बद्धानि उत्कृष्टचिन्तनान्यभिव्यक्तानि सन्ति। राज्यसञ्चालनस्य विषये विद्याध्ययनस्य विषये राष्ट्रियसम्पदायाः सदुपयोगस्य विषये चास्य कवेर्महान् विचारोऽनुभूयते। भारतवर्षीयाणां जीवनपद्धतिः प्रायःकृषिकर्मणि निबद्धाऽस्ति। अतः कृषिर्जीवननिर्वाहस्य प्रमुखसाधनमस्ति। कृषिश्च वर्षाधीनाऽस्ति। अत एव कालिदासः स्वीये मेघदूताख्ये काव्ये वर्षां दृष्ट्वा मोदमानानां वनितानां प्रसङ्गमुद्भावयति। तत्र कृषकवनिता मेघं सोत्कण्ठं सस्नेहञ्चावलोकयन्ति – 'त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः, प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः' (मेघदूतम् पू. १६)। अत एव च कालिदासः स्वीये मेघदूते यत्र यत्र वृष्टेरभावस्तत्र तत्र यात्रामिषेण मेघं प्रेषयति। कृषेः सम्पत्तये वृष्टेः परमावश्यकता सा च वृष्टिर्यज्ञादेव सम्भवा। यथाह गीता- 'यज्ञाद् भवति पर्जन्यः पर्जन्यादन्नसम्भवः' इति (भगवद्गीता-३/१४)। अत एव कालिदासेन स्वरचनामु दिलीप-रघु-दुष्यन्त-पुरुरवःप्रभृतीनां राज्ञां यज्ञानां बाहुल्येन वर्णनं कृतम्। वृष्ट्यर्थं नरेन्द्रस्य देवेन्द्रस्य च परस्परसहयोग आवश्यकः। नरेन्द्रः पृथ्वीं दुग्ध्वा सम्पत्तिमधिगम्य यज्ञं करोति। यज्ञेन प्रीतो देवेन्द्रो दिवं दुग्ध्वा वृष्टिं करोति। एवमुभौ परस्परसम्पद्विनिमयेनोभयलोक कल्याणं कुरुतः। यथाह स रघुवंशे- दुदोह गां स यज्ञाय शस्याय मघवा दिवम्। सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्॥ हविरावर्जितं होतस्त्वया विधिवदग्निषु। वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम् (रघुवंशः १/२५) इति॥ अभिज्ञानशाकुन्तलेऽपि तेन उभयलोककल्याणाय नरेन्द्रदेवेन्द्रयोः परस्परसहयोगस्यावश्यकत्वं प्रदर्शितम्- तव भवतु विडौजाः शस्यवृष्टिः प्रजासु। त्वमपि विततयज्ञो वज्रिणं प्रीणयस्व (अभिज्ञानशाकुन्तलम् ७/३४)॥ इत्यादि। विक्रमोर्वशीयेऽपि महाकविना एवं प्रोक्तम्- 'त्वत्कार्यं वासवः कुर्यात् त्वञ्च तस्येष्टमाचरेः" (विक्रमोर्वशीयम् ५/२०) इति। भरतवाक्येषु कालिदासस्य वासवाद् वृष्टेरभिकामना राष्ट्रस्य समृद्धये परमावश्यकीति मान्यं सिद्धान्तं प्रतिपादयति। कालिदासोत्तरवर्तिना कविना भारविणा तु सुस्पष्टमुक्तं यत्कृषेः सम्पन्नतैव देशस्य समुद्धिः शोभा च- सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव शस्यसम्पदः। वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति (किरातार्जुनीयम् ३/३७)॥ अस्माकं शासनमपि कृषेः सम्पन्नतायै विविधायोजनानां परिचालने निरतं दृश्यते। कालिदासेन वाणिज्यस्यापि वर्णनमार्थिकदृष्ट्या कृतमस्ति। भारतस्य व्यापारसम्बन्धो विभिन्नद्विपैः सहासीदित्यनेन श्लोकांशेन प्रतीयते- -द्वीपान्तरानीतलवङ्गपुष्पैरपाकृतस्वेदलवा मरुद्भिः" (कालिदासः, सन् १९८०, पृ. १९७) इति। चीनदेशेन सह भारतस्य व्यापारसम्बन्धको कौशेयवस्त्रस्य कृते प्रसिद्ध आसीदिति कालिदासेनैकत्र कृतेन चीनांशुकस्योल्लेखेन विज्ञायते- 'चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य', (कालिदासः, २०१७, पृ. ७०),'सन्तानकाकीर्णमहापथं तच्चीनाङ्शुकैः कल्पितकेतुमालम्" (कालिदासः, सन् १९७६, पृ. ८४) इति। मालविकाग्निमित्रस्य विवरणैर्विज्ञायते यद्- देशस्यान्तर्व्यापारः सुसमृद्ध आसीत्। तदानीं व्यापारिवर्गः जलमार्गेण स्थलमार्गेण च निर्वाधं गच्छति स्म- सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु' (कालिदासः, सन् १९८०, पृ. ५१०)॥ इति। तात्पर्यमिदं यद् राष्ट्रियार्थिकस्थितेः सुदृढतायै वाणिज्यं विशेषमहत्त्वमादधातीति कालिदासस्याभिमतम्।

व्यक्तेः समाजस्य च कृते पशुधनस्य महानुपयोगः। राष्ट्रस्य समृद्धये पशुसम्पदः संरक्षणमत्यावश्यकम्। अत एव कालिदासेन गोरक्षाय चक्रवर्तिना सम्राजा दिलीपेन प्राणोत्सर्गस्य सङ्कल्पः कारितः। गौः केवलं पय एव न ददाति, अपितु सा विविधप्रकारैः राष्ट्रस्य समृद्धौ सहयोगं ददाति। अत एव सा कामदुघा कथ्यते- न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम्" (रघुवंशम् २/६२) इति। न केवलं गोरेव गजसम्पदोऽपि रक्षा आर्थिकदृष्ट्या आवश्यकी। अत एव गजाखेटकारी राजादशरथः शास्त्रविरुद्धं कार्यमकरोदिति कालिदासस्य विचारः- नृपतेः

प्रतिषिद्धमेव तत्कृतवान् पङ्क्तिरथो विलङ्घ्य यत्, अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः (रघुववंशम् ९/७४) इति ॥ महाकवेर्मानसभूते अभिज्ञानशाकुन्तले तु स्पष्टमेव पशुहिंसाया निषेधो विहितोऽस्ति । कविमृगया विहारिणं दुष्यन्तमादेशवचोनिभैरक्षैरारम्भ एवोपदिशति- तदाशु कृतसन्धानं प्रतिसंहर सायकम् । आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि (कालिदासः, २०१७, पृ. २१) ॥ इति । वृक्षाणां रोपणं रक्षणञ्च राष्ट्रियायस्य राष्ट्रसमृद्धेश्च महत्त्वपूर्णं स्रोतोऽस्ति । वृक्षेषु देवदारुवृक्षस्य प्राधान्यम्, महदुपयोगित्वञ्च विद्यते । अत एव भगवता शङ्करेण पुत्रीकृतं पार्वत्या च पुत्रवत् पालितं देवदारुं रक्षितुं सिंहः सर्वात्मना समुद्यतोऽस्ति- 'अमुं पुरः पश्यसि देवदारुं पुत्रोकृतोऽसौ वृषभध्वजेन" (रघुवंशः २/३६) इत्यादिकथनस्य सारांशोऽयं यत् कविदृष्टौ वृक्षाणां वनानाञ्च संरक्षणमतिमहत्त्वपूर्णमस्ति। अधुनाऽपि वैज्ञानिकयुगे वृक्षा वृष्टेः कारणानि मन्यन्ते। अत एव शासकैरपि वृक्षारोपणस्य वृक्षरक्षणस्य योजना परिचालिताऽस्ति । कालिदासस्य समये वृक्षाणां रोपणं वर्द्धनं रक्षणञ्च परमकर्तव्यत्वेन निर्धारितमासीत् । अत एव पार्वतीशकुन्तलाप्रभृतीनां नारीणां वृक्षाणां सम्वर्द्धनं संरक्षणं सेचनञ्च विशेषतो वणिमस्ति । 'विषवृक्षोऽपि सम्बर्ध्य स्वयं छेत्तुमसाम्प्रतम्' (कुमारसंभवः २/५५) इत्युक्तिरपि कालिदासस्य वृक्षप्रियतामभिव्यनक्ति । सेचनस्य व्यवस्थायै वापी-रूप-तडागादीनां निर्माणमपि निर्दिष्टमस्ति कविना । कालिदासेन खनिजपदार्थानां सञ्चयमपि आर्थिकदृष्ट्या महत्वपूर्णं मन्यते–'खनिभिः सुषुवे रत्नं क्षेत्रैः शस्पं वनैर्गजान्' इति । अस्मिन् श्लोके कालिदासेनार्थिकस्य समस्तस्रोतांसि संक्षेपतो निर्दिष्टानि सन्ति । राष्ट्रशक्तेः समृद्धये अर्थसञ्चय आवश्यकः । किन्तु सः सञ्चयः प्रजासु वितरणायै एवाभिनन्द्योऽस्ति– 'आदानं हि विसर्गाय सतां वारिमुचामिव'(रघुवंशः ४/८६) इति। संक्षेपतो नीतिपूर्वकमर्थोपार्जनं समाजहितेषु तद्वितरणञ्च कालिदासस्यार्थनीतेरुद्देश्यमस्ति । राजा प्रजाभ्यो यावन्तं करं गृह्णीयात् ततः सहस्रगुणमभ्युदयं स प्रजानां कुर्यादिति कालिदासस्य सन्देशः- प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् । सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः (रघुवंशः १/१८) ॥ इति । परन्त्विदानीं स्थितिस्ततो विपरीता । प्रजा विविधकरभारैराक्रन्ता विद्यते। समाजस्य धनिवर्गो विशेषतो व्यापारिवर्गो व्यापारधनगोपनकरप्रवञ्चनादिभिः स्वार्थमयप्रवृत्तिभिर्धनसञ्चये निरतोऽस्ति येन समाजस्यार्थिकी व्यवस्था समीचीना नास्ति । आर्थिकाव्यवस्थैव सामाजिकानर्थस्य मूलकारणम् । तां व्यवस्थां द्रढयितुं शासनेन राष्ट्रेण विविधोपायाश्चिन्तनीयाः । कालिदासस्य साहित्येऽपि इमे विषयाः सङ्केतिताः सन्ति । अन्नसम्पदाया अपूर्णत्वं तथा जनसंख्यायाः समधिकां वृद्धिं विलोक्य शासनेन परिवारनियोजनादियोजना परिचालिता विद्यते । सन्तुलितपरिवारः सुखी सम्पद्यते । बालकानां पोषणं शिक्षणञ्च सम्यक्तया सन्तुलितपरिवारे सम्भवति । बालका एव देशस्य भाविनः कर्णधाराः सन्ति । अतस्तेषां शिक्षा-दीक्षयोः पालनपोषणयोश्च समुचिता व्यवस्था आवश्यकी । सा च विस्तृते परिवारे न सम्भवति । अतः शासनेनेयं योजना विधिरूपाङ्गीकृता । कालिदासेनेयं योजना स्वसाहित्ये स्पष्टतो न निर्दिष्टा, किन्तु यत्र तत्र तेन वर्णितं सुखमयपारिवारिकजीवनयोजनामिमां विधिरूपां न, किन्तु नैतिकरूपामवश्यं निर्दिशति । कालिदासस्य 'प्रजायै गृहमेधिनाम्' (रघुवंशम् १/७) अर्थात् 'सन्तानोत्पत्तये गृहस्थाश्रमः' इयमुक्तिः परिवारकल्याणस्य परिवारनियोजनस्य वा मूलमन्त्रोऽस्ति । कालिदासो गृहस्थः कविरासीत् । अत एव तस्य साहित्ये सर्वत्र गार्हस्थ्यजीवनस्य मनोरमं चित्रमङ्कितमास्ते । दाम्पत्यप्रेम गार्हस्थ्यजीवनस्य सर्वस्वं तत् प्रेम सन्तानोत्पत्तौ विभक्तमपि नितरां वर्द्धत एव- 'विभक्तमप्येकसुतेन तत् तयोः परस्परस्योपरि पर्यचीयत' (कालिदासः, सन् १९८०, पृ. ८६) इति । मातापितृभ्यां सुसंस्कृतो बालको गुणवान्, तेजस्वी च जायते – 'दिलीपसूनुमणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ' इति। मातापितृभ्यामभिर्वादतो बालको बालचन्द्र इव दिन दिने वर्धते, पुष्टिमाप्नोति, उत्तरोत्तरं वर्धमानां कान्तिमापद्यते । बालको मातापितृभ्यामेव प्राथमिकीं शिक्षां गृह्णाति। सैव शिक्षा तस्य जीवनस्य मूलाधारो भवति- 'मातापितृकृताभ्यासो गुणितामेति बालकः' इति । एतत्सर्वं सन्तुलितपरिवार एव सम्भवति । कालिदासेन वर्णिता दिलीप-रघु-दुष्यन्त-पुरुरवः-शिवप्रभृतीनां सर्वेषामेव परिवाराः सन्तुलिताः सुखिनश्चासन् । तेषु परिवारेषु सन्तानबाहुल्यं नासीदतस्तत्र सौमनस्यं विराजते स्म । कालिदासस्य कुमार-रघु-राम-कुश-लव-सर्वदमनायुःप्रभृतयः सर्व एव बालकाः सुसंस्कृताः,

माता पितृभ्यामभिवर्धिताः मातापितृकृताभ्यासाः गुणिताः, पित्रोरानन्दवर्द्धनाः, शैशवेऽभ्यस्तविद्याः, पितृभक्ताः, विनयशीलाः, गुरुभिरमभिनन्दिताः, पितृभिः सम्भाविताः, कुलस्य प्रतिष्ठाः, वंशस्य कर्तारः, अमितपराक्रमा आसन् । भारतवसुधाया गौरववर्धना विद्याविनयसम्पन्ना एतादृशा एव वीरबालकाः कालिदासस्याभिमताः सन्ति । ये सिहानां दन्तोत्पाटने समर्थाः स्युः। परन्तु खेदस्य विषयोऽयं यद्राष्ट्रस्य बहवः कुमाराः पित्रोरभिरक्षणाभावात्, मातापितृकृताभ्यासाभावाच्च नाभिवाञ्छितां पुष्टिं गुणितां लभन्ते । अतः कालिदासेन परिवारस्य समाजस्य कल्याणाय सुसङ्केतितं सन्तुलितं सुनियोजितञ्च पारिवारिकपृहणीयमास्ते । अधुना देशे सुशिक्षिता अपि वृत्तिहीनत्वाद्दयनीयां स्थितिमापन्नाः सन्ति। यदा राष्ट्रे वृत्तिहीनानां संख्या वर्धते, तदा सामाजिकी अव्यवस्था जायते, राष्ट्रस्यान्तरिकशक्तिरपि क्षीणतां याति। अस्यां स्थितौ शासकैर्विभिधा योजनाः सञ्चालनीया यया वृत्तिहीना जनाः सवृत्तिका भवेयुः । विषयेऽस्मिन् कालिदासस्यापि सुस्पष्टो निर्देशो दृश्यते । यथोक्तं तेन स्वीये रघुवंशे रघुवंश्यानां राज्ञां लोककल्याणकर्माण्युपवर्णयता- ते सेतुवार्ता गजगन्धमुख्यैरभ्युच्छ्रिता कर्मभिरप्यबन्ध्यैः अन्योन्यदेशप्रतिभागसीमां वेलां समुद्रा इव न व्यतीयुः (कालिदासः, सन् १९८०, पृ.१८०) ॥ इति । शासकानां कर्तव्यमपि कालिदासेनाभिव्यक्तमस्ति । प्रजानां रक्षायाः शिक्षाया आजीविकायाश्च सुव्यवस्था शासकानां मुख्यं कर्तव्यमस्ति- प्रजानां विनयाधानाद्रक्षणाद्भरणादपि । स पिता पितरस्तासां केवलं जन्महेतवः (रघुवंशम् १/२४) इति ॥ राष्ट्ररक्षायै शत्रूणां दमनमावश्यकम्, राष्ट्रस्य शत्रवो द्विविधाः- बाह्या, आभ्यन्तराश्च । बाह्याःशत्रवोऽनित्याः दूरे च तिष्ठन्ति । आभ्यन्तराः शत्रवो नित्याः सन्निकटाश्च । तत्र बाह्याः शत्रवो राष्ट्रोन्नतेस्तथा बाधका न भवन्ति यथा आभ्यन्तरा जायन्ते । अत आभ्यन्तरशत्रूणां दमनं परमावस्यकमिति कालिदास्य विचारः- "अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः । अतः सोऽभ्यन्तरान् नित्यान् षट्पूर्वमजयद्रिपून्" । रघुकुलराजानां शासनव्यवस्थां वर्णयता तेन प्रजानां रक्षा राज्ञां प्रमुखं कर्तव्यमिति निर्दिष्टमस्ति। तेषां शासनकाले अस्वास्थ्यम्, शत्रूणां भयम्, चौर्यम्, बालिकाः प्रति विप्रक्रियाप्रभृतिदुर्वृत्तयः श्रूयन्त एव न । तद्यथा- 'जनपदे न गवः पदमादधावभिभवः कृत एव सपत्नजः' (कालिदासः, सन् १९८०, पृ. २७५) इति। तदानीं सुदूरदेशैः सह समुद्रमार्गेण, नदीमार्गेण, पर्वतमार्गेण च व्यापारं कुर्वतां व्यापारिवर्गाणां सुरक्षायाः समुचिता व्यवस्थाऽऽसीत्- 'वापीष्विव स्रवन्तीषु वनेषूपवनेष्विव । सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु' (कालिदासः, सन् १९८०, पृ. ५८०) इति ॥ कालिदासस्यैष सुरक्षाविवेकः राष्ट्रहिताय सर्वथा ग्राह्योऽस्ति।

कालिदासः शिक्षायामुदारदृष्टिरासीत् । स यथा पुरुषशिक्षायाः समर्थकस्तथैव स्त्रीशिक्षाया अपि । स्त्रीशूद्रौ नाधीयाताम् इति प्राचीनमान्यता तस्याभिमता नासीत्। कालिदासस्य सर्वा एव नायिकाः सुशिक्षिताः, परिष्कृतचित्ताः, नृत्यगीतादिललितकलाप्रवीणा आसन्। परिवारस्य, समाजस्य, राष्ट्रस्य चाभ्युदयाय पुरुषाणामिव नारीणामपि शिक्षा परमावश्यकीति कालिदासोऽपि मन्यते स्म । मालविकाग्निमित्रे कालिदासेन शिक्षायाः, शिक्षार्थिनः, शिक्षकस्य परीक्षायाः, परीक्षकस्य यद्रूपं वर्णितम् तदधुनापि सर्वतोभावेनानुकरणीयमस्ति। अस्मिन् नाटके प्रथमाङ्के गणदासहरदत्तयोर्विवाद एको मनोरञ्जकः प्रसङ्गोऽस्ति । यत्र शिक्षायाः, शिक्षार्थिनः, शिक्षकस्य, परीक्षायाः, परीक्षणस्य च व्यावहारिकरूपं दृष्टिमेति। गणदास-हरदत्तयोः प्रयोगनैपुण्यस्य परीक्षणाय मध्यस्थायाः परिवाजिकाया कौशिक्या नियुक्तिरिदं सूचयति यत् परीक्षार्थिनां सम्बन्धिनः परीक्षकत्वेन न नियोक्तव्या यतस्तत्र पक्षपातः सम्भाव्यते । कदाचिदेकस्य परीक्षकस्य निर्णयः परीक्षार्थिनः प्रति प्रतिपक्षपाताय, अन्यायाय या कल्पते। अतो द्वौ ततोऽधिका वा परीक्षा नियोक्तव्याः। एवङ्कृतेऽन्यायस्य सम्भावना न संभवतीति कालिदासस्य मतम् । अतः परीक्षिका परिवाजिका तत्र वदति- 'नैतन्न्याय्यम् सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय' इति । इयं पद्धतिरद्यापि विश्वविद्यालयेषु दृश्यते। शिक्षकस्य सम्बन्धे कालिदासस्य मतमस्ति यत् कस्मिँचित् शिक्षके ज्ञानस्याधिक्यं भवति, कस्मिँश्चिदध्ययनकलाया नैपुण्यं दृश्यते यत्रोभौ गुणौ दृश्येते स उत्तमः शिक्षकः-'श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रातिरन्यस्य विशेषयुक्ता। यत्रोभयं साधु सशिक्षकाणां धुरि प्रतिष्ठापयितव्य एव' (कालिदासः, सन् १९७६, पृ.

२६५) । शिक्षकः केवलं जीविकार्थं शिक्षां ददाति, स ज्ञानविक्रेता वणिगस्ति- 'यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति' (कालिदासः, सन् १९७६, पृ. २७०) । वेतनभोगिनामाचार्याणां वेतनदानस्य सार्थक्याय कार्यजातं समये समये परीक्षणीयम् । यथाह तत्र विदूषकः- 'पश्याम उदरम्भरिसंवादम् । कि मुधा वेतनदानेनैतेषाम्' इति । शिष्याणां परिग्रहे कालिदासस्य विचारोऽस्ति यद् योग्या एव शिष्या अध्यापनाय ग्रहीतव्याः । अयोग्यशिष्याणां ग्रहणं गुरोर्बुद्धिहीनतां द्योतयति- विनेतुरद्रव्यपरिग्रहोपि बुद्धिलाघवं प्रकाशयति । शिष्यस्य योग्यताया निर्णयस्तस्य पुस्तकीयज्ञानेन न भवति, तदर्थं प्रायोगिकज्ञानस्य परीक्षणमावश्यकम्- 'सुशिक्षितोऽपि सर्व उपदेशदर्शनेन निष्णातो भवतीति' । शिक्षायाः सम्बन्धेऽपि कालिदासस्य विचारः सर्वथा उपादेयोऽस्ति । तस्य मते शिक्षाया मुख्यमुद्देश्यमस्ति ज्ञानप्राप्तिस्तथा विनयः, अर्थात् शीलसम्पन्नता । ज्ञानेन मानवः संसारेऽस्मिन् सुखसाधनान्यर्जितुं शक्नोति; किन्तु शीलस्याभावे तस्य मनसि काम-क्रोध-लोभ-द्वेषादयो विकारा उत्पद्यन्ते येन संसारे सर्वत्र चौर्यस्य, कलहस्य, युद्धस्य, रक्तपातस्य च दृश्यानि दृष्टिपथमायान्ति । इयमेव दशाऽधुना संसारस्य । अत एव कालिदासेन ज्ञानेन (प्रबोधनेन) सह शीलस्य (विनयस्य) प्राप्तिः शिक्षायाः (विद्यायाः) प्रमुखमुद्देश्यं प्रतिपादितम्- 'सम्यगागमिता विद्या प्रबोधविनयाविव' इति । कालिदासेन रघुवंश्यानां राज्ञां वर्णनं कुर्वता सामाजिकजीवनस्य यदादर्शरूपं चित्रितं तदधुनापि सर्वतोभावेन ग्राह्यमस्ति । कालिदासस्य समाजस्त्यागाय अर्थसञ्चयं करोति, सत्याय मितं भाषते, यशसे विजयमभिलपति ( न तु परपीडनाय) सन्तानोत्पत्तये गार्हस्थ्यं पालयति ( न तु कामोपभोगाय) । समाजस्य मनुष्याः शैशवे विद्याभ्यासं कुर्वन्ति, यौवने विषयाणामुपभोगं वाञ्छन्ति, वार्धक्ये जगतः समस्तप्रपञ्चतः पृथक् स्थित्वा शान्तिमयं जीवनं यापयन्ति (कालिदासः, सन् १९८०, पृ. ८) । समाजस्य निम्नस्तरीया दशापि तेन वर्णिताऽस्ति याऽधुनापि तादृश्येव । अस्मिन् प्रसङ्गेऽभिज्ञानशाकुन्तलीयो धीवरप्रसङ्गो दर्शनीयोऽस्ति । तदानीम् आरक्षिविभागस्योच्चाधिकारिणोऽपि उत्कोचं गृह्णन्ति स्म, सुरापानं च कुर्वन्ति स्मेति ततो ज्ञायते । इदानीमपीयं स्थितिर्यत्र कुत्रचिद् दृश्यते । किन्तु तत्र धीवरस्य मुखेन 'सहजं किल यद् विनिन्दितं न खलु तत्कर्म विवर्जनीयम्' इत्युपदिशन् कालिदासः समाजस्य व्यवस्थायै 'श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्, 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' (वेदव्यासः, २०७५, पृ. ३५) इति गीताया लोकहितमुपदेशं प्रचारयितुमिच्छति ।

धर्मसाधनायाः सम्बन्धेऽपि कालिदासस्य विचारो युगानुगो विद्यते । शरीरनिरपेक्षा धर्मसाधनाऽस्माकं प्राचीनधर्मशास्त्रकाराणां व्यवस्थास्ति । कालिदासः शरीरसापेक्षां धर्मसाधनां श्रेयस्करीं मन्यते । अत एव स कुमारसम्भवे (पञ्चसर्गे) ब्रह्मचारिमुखेनोपदिशति- 'शरीरमाद्यं खलु धर्मसाधनम्' (कालिदासः, सन् १९७६, पृ. ७१) इति । वस्तुतः कन्दमूलफलानां दुग्धदधिघृतादीनाञ्च प्राचुर्येण रहिते स्वल्पायुषि रोगबहुले चास्मिन् युगे धर्मसाधने शरीरस्योपेक्षा श्रेयसे न । वैवाहिकसम्बन्धस्य विषये कालिदासस्य दृष्टिरुदारासीत् । स प्रौढविवाहस्य समर्थक आसीत्। तस्य इन्दुमती-पार्वती-मालविकाशकुन्तला प्रभृतयः सर्वा एवं नायिका लोकव्यवहाराभिज्ञा: प्रौढा आसन् । ताभिः स्वयं स्वपतयो वृता इति प्रदर्शयन् कालिदासः प्रेमविवाहस्य समर्थक आसीदिति नावगन्तव्यम् । यतो हि - अतः परीक्ष्य कर्तव्यं विशेषात् संगतं रहः । अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥ इति ब्रुवता कालिदासेन गान्धर्वविवाहमथवा प्रेमविवाहं प्रति स्वकीय आन्तरिको विरोध स्पष्टीकृतः । अत एव तेन कुमारसम्भवे पार्वत्या तपस्यया एकनिष्ठप्रेम्णा च निर्जितः शङ्करो विधिवदनुमोदितं विवाहं प्रति प्रवृत्तमानसः कृतः । समाजे गर्हितानां वेश्यानां सम्बन्धेऽपि कालिदासोऽसंकीर्णहृदय आसीत् । उज्जयिन्या महाकालस्य मन्दिरे महाकालस्य सेवायां वेश्यानां प्रवेशं कारयन् कालिदासः स्वीयामसंकीर्णहृदयतां सम्यगभिव्यनक्ति- 'पादन्यासैः क्वणितरशनास्तत्र लीलावधूतैः रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः, वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दून्' (कालिदासः, सन् १९९३, पृ. ७९) ॥ इति । अनेन प्रकारेण कालिदासः विविधान् विषयान् स्वविरचितकाव्येषु निक्षिपति । एते विषया न केवलमेककालिका अपितु सार्वदेशिकाः सार्वकालिकाश्च सन्ति । एतादृशैश्चिन्तनप्रवाहैरेव कवयः कीर्तिकलेवरेण कल्पान्तं जीवन्ति ।

## उपसंहारः

पौरस्त्यवाङ्मये प्रसिद्धेषु कविष्वन्यतमः कालिदासः स्वकीर्तिकलेवरेण सर्वदैव समानरूपेण जीवति। सर्वैः स्मर्यते च। कालिदासस्य कृतीनामध्ययनेन चिन्तनेन च एतदवगन्तुं शक्यते यत्- वस्तुतः कालिदासः समाजे नवीनतामाधातुमुत्सुक आसीत्तस्य 'पुराणमित्येव न साधु सर्वम्' इति क्रान्तिकारी उद्घोषस्तस्याधुनिकतां परिपोषयति। महाकवेरेष निर्देशो वर्तमानकवीनां परमोपयोगी वर्त्तते। परम्पराया: परिपालनमेव कवेरीतिकर्तव्यता नास्ति। परम्परायाः किञ्चित् पृथक् स्थित्वा समाजस्य कल्याणाय हिताय च कविभिः काव्यरचनाया माध्यमेन युगानुगो नवीनो विचार: समुपस्थापनीय इति कालिदासस्यामिमतम्। कालिदासः स्वकीयेनानवद्येन कविकर्मणा एतादृशं राष्ट्रं निर्मातुमिच्छति, यत्र शासकाः प्रजानां हिते सततं प्रवृत्ताः स्युस्तथा विदुषां वाणीनां समादरो भवेत्। वस्तुतो राष्ट्रस्य समुन्नतयेऽर्थवैभवस्य बुद्धि वैभवस्य च (अर्थात् शासकानां विदुषाञ्च परस्परसहयोगः परमावश्यकः। यथाह कालिदासो विक्रमोर्वशीये भरतवाक्ये -'परस्परविरोधिन्योरेकसंश्रयदुर्लभम्। संगतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् (कालिदासः, सन् १९७६, पृ. ४२३)॥ इति। शासनं बुद्धिनियन्त्रितमेव राष्ट्रकल्याणाय कल्पते इति कालिदासस्य सर्वमान्यसिद्धान्तः। कालिदासस्य कविकर्मणि समस्तमानवतायाः कल्याणकामना निहिताऽस्ति - 'सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु। सर्व: कामानवाप्नोतु सर्वः सर्वत्र नन्दतु'॥ इति। एतादृशी राष्ट्रिया लोककल्याणकामना वैदिककविभ्यः परं वाल्मीकि-व्यासयोरासीत्ततः परं कालिदास एव दृश्यते, नापरेषु कविवरेषु। अत एव विश्वकवेः कालिदासस्य कविकर्मणो देशे विदेशे च सर्वत्र समभावेन समादरो दृश्यते। कविरयं स्वकीये समये यथा प्रसिद्धः समादरणीयश्चासीदिदानीमपि स तथाविध एव विराजते। अत एव तु नीतिकारैरुक्तम्- जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः। नास्ति येषां यशःकाये जरामरणजं भयम् (भर्तृहरिः, सन् १९९०, पृ. १५)॥ इति। रामायण-महाभारतवत् कालिदासस्य काव्यान्यपि विश्वसमाजस्योपादेयानि सन्ति। कालिदासं विहायान्येषु कविषु एतादृशं चिन्तनं नैवावलोक्यते। अत एव 'काव्येषु माघः कविकालिदासः' इत्युक्तिः कालिदासस्य सर्वोपरितां द्योतयति।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कातज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची:

कालिदासः. (सन् १९८०). *रघुवंशमहाकाव्यम्.* वाराणसीः चौखम्बा सस्कृत प्रतिष्ठान।

कालिदासः. (सन् १९९३). *मेघदूतखण्डकाव्यम्.*वाराणसीः चौखम्बा विद्याभवन।

कालिदासः. ( २०१७). *अभिज्ञानशाकुन्तलम्.*वाराणसीः चौखम्बा संस्कृत सीरिज।

कालिदासः. (सन् १९७६). *कुमारसम्भवमहाकाव्यम्(रेवाप्रसाद द्विवेदी सं.).* वाराणसीः काशी हिन्दू विश्वविद्यालय।

कालिदासः. (सन् १९७६). *कालिदासग्रन्थावलिः.* वाराणसीः काशी हिन्दू विश्वविद्यालयः।

भर्तृहरिः. (सन् १९९०). *नीतिशतकम्.* वाराणसीः मोतीलाल बनारसीदास।

वेदव्यासः. (२०७५). *श्रीमद्भगवद्गीता.* गोरखपुरः गीताप्रेस।